संस्कृतवार्ता:

16.02.2025

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· प्रधानमन्त्री श्री नरेन्द्रमोदी नवदिल्ल्यां भारतमण्डपे भारत-टेक्स इत्यस्मिन् कार्यक्रमे सभां सम्बोधयति।

· राष्ट्रपति: द्रौपदी मुर्मु: अद्य नवदिल्ल्यां पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य आदिमहोत्सवस्य उद्घाटनम् अकरोत्।

· गतरात्रौ नवदिल्ली-रेलस्थानकस्य दुरापन्नाया: घटनाया: विषये रेल-संस्थया उच्च स्तरीय अन्वेषणं प्रारब्धम्, यस्मिन् अष्टादश-जना: मृत्युमुपगता: इति सूच्यते।

· सर्वकार: हृदयविदारिकायां घटनायां मृतकानां कुटुम्बकेभ्य: दशलक्ष-रूप्यकाणि, अपि च व्रणितानाम् कृते सार्धद्विलक्ष-रूप्यकाणि अनुदानराशित्वेन अघोषयत्।

· अमेरिकादेशस्य रक्षासचिव: मार्कोरूबियो इत्येष: रूसदेशेन सह सम्मिलिष्यति।

· क्रिकेट स्पर्धायां अद्य गुजात जायन्ट्स दलं यूपी वॉरियर्स दलं सम्मुखिकरिष्यति।

<u>प्रधानमन्त्री-भारत</u>

प्रधानमन्त्री श्री नरेन्द्रमोदी नवदिल्ल्यां भारतमण्डपे भारत-टेक्स इत्यस्मिन् कार्यक्रमे सभां सम्बोधयति। स: प्रदर्शनिक्षेत्रे प्रदर्शकै: सह संवादं अकरोत्। भारत टेक्स इति प्रमुख: वैश्विक-कार्यक्रम: शुक्रवासराद् आरभ्य श्व: सोमवासरं यावत् प्रचलति। भारत-टेक्स इति मञ्च: वस्त्र-उद्योगस्य बृहत्तम: सर्वसमावेशक: अस्ति सममेव अशेषं वस्त्रपरिस्थितिकीं प्रदर्शयति।

## राष्ट्रपति

राष्ट्रपति: द्रौपदी मुर्मु: अद्य नवदिल्ल्यां पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य आदिमहोत्सवस्य उद्घाटनम् अकरोत्। जनसमूहं सम्बोधयन्ती राष्ट्रपति: मुर्मु: अवोचत् यत् देशस्य जनजातीय-जनानाम् परम्परा जीवनशैली च राष्ट्रस्य संस्कृतिं समृद्धां करोति। अत्रावसरे सा उक्तवती यत् अस्य वर्षस्य अर्थसङ्कल्पना-पत्रे जनजातीय-जनानां कल्याणार्थं निहितं धनं त्रिगुणितं यावत् वर्धितमस्ति। सा अवोचत् यत् देश: तदैव विकसित: भविष्यति यदा आदिवासिसमाज: विकसित: भविष्यतीति।

## दिल्ली-दुर्घटना

गतरात्रौ नवदिल्ली-रेलस्थानकस्य दुरापन्नाया: घटनाया: विषये रेल-संस्थया उच्च स्तरीय अन्वेषणं प्रारब्धम्, यस्मिन् अष्टादश-जना: मृत्युमुपगता: इति सूच्यते। उत्तर रेलविभागस्य मुख्य जनसम्पर्कधिकारिणा हिमांशु-शेखर-उपाध्यायेन संसूचितं यत् जन सम्मर्दे ये जना: मृत्युमुपगता: तेषु एकादश महिला:, पञ्चबाला: सन्ति। अत्रावधौ त्रयोदश जना: व्रणिता:।

दिल्ली-अरक्षक-बलम् घटनाक्रमम् अन्वेष्टुं सी.सी.टी.वी. इति चित्राङ्कनस्य विश्लेषणं करोति। सर्वकार: अस्यां हृदयविदारिकायां घटनायां मृतकानां कुटुम्बकेभ्य: दशलक्ष्य रूप्यकाणि अनुदानराशित्वेन अघोषयत्। अपि च व्रणितानाम् कृते सार्धद्विलक्ष्य-रूप्यकाणि अनुदानराशित्वेन अघोषयत्।

बिहारस्य मुख्यमन्त्रिणा नीतीश-कुमारेण घटनायां ये बिहारवासिन: मृत्युमुपगता: तेषां कुटुम्बकेभ्य: द्विलक्ष रूप्यकाणां अनुग्रहराशे: उद्घोषणा विहिता। सममेव व्रणितानां कृते पञ्चाशत् सहस्र रूप्याकाणाम् अनुग्रह राशे: घोषणा विहिता।

## यूक्रेन-अमेरिका-रूस

अमेरिकादेशस्य रक्षासचिव: मार्कोरूबियो इत्येष: रूसदेशेन सह सम्मिलिष्यति। यूक्रेनदेशे युद्धविराममाभिलक्ष्य वार्तायै अधिकारिण: सऊदी-अरबदेशे समाहूता: सन्ति। अनेन यूरोपदेशसमूहेषु भयोऽयं समुत्पन्नोऽस्ति यत् ते अस्मात्प्रकरणात् अपसारयिष्यन्तीति। प्रत्युत्तरे फ्रांसदेशस्य राष्ट्रपतिना इमैनुएल-मैक्रों इत्यनेन श्व: पेरिसनगरे यूरोपीयनेतृणां आपातकालिकं सम्मेलनमेकं समाहूतमस्ति।

## जयशंकर-म्यूनिख-सुरक्षा-सम्मेलनम्

भारतस्य विदेशमन्त्री सुब्रह्मण्यं जयशंकर: जर्मनी-देशस्य म्यूनिख इति क्षेत्रे नैकेषां राष्ट्रणां विदेशमन्त्रिभिस्समं विभिन्नेषु विषयेषु चर्चां कृतवान्। अवसरेऽस्मिन् विदेशमन्त्री एस० जयशंकर:, इस्राइलदेशस्य विदेशमन्त्री गाइडियनसार इत्येताभ्यां एशिया-यूरोप-अमरीका चेति देशानां इस्राइलदेशस्य मार्गेण संयोजनस्य अमरीका-देशस्य राष्ट्रपतिन: डोनाल्डट्रम्प इत्यस्य योजनाया उपर्यपि विचारविनिमयो विदित:।

## दिल्ली-आरक्षिबलस्य स्थापनादिवस:

देहली आरक्षिबलेन अद्य स्वकीय: अष्टसप्ततितम: स्थापनादिवस-समारोह: समायोजित:। आयोजनमिदं किंग्सवे कैम्प परेडग्राउण्डाख्ये क्षेत्रे समायोजितम्। यत्र देहली-आरक्षिबलस्य सदस्यानां परिजना: अपि समुपस्थिता: आसन्। आयोजनेऽस्मिन् मुख्यातिथित्वेन गृहराज्यमन्त्री नित्यानन्दराय: समुपस्थित: आसीत्, तेन दिल्ली आरक्षिबलस्य महानिदेशकस्य संजय-अरोड़ा इत्येतस्य समुपस्थितौ बलस्य अभिवादनं स्वीकृतम्। अवसरेऽस्मिन् सम्बोधयन् श्रीराय: उक्तवान् यत्-दिल्ली-आरक्षिबलं राष्ट्रस्य शीर्षतमेषु आरक्षिबलेषु अन्यतमं स्थानं धत्ते। अवसरेऽस्मिन् मन्त्रिणा जी-विंशति: इत्यस्य सफल-आयोजनेन सह कोरोनेति महामार्या: कालेऽपि दिल्ली-आरक्षिबलस्य सुप्रबन्धनस्य प्रशंसा कृता।

## अथ महाकुम्भवार्ता:

आस्थविश्वासयो: विषये एकं जलवायुसम्मेलनं समायोजितम्। ध्यातव्यमस्ति यत् प्रयागराजे चलायमाने महाकुम्भे अद्य जलवायुपरिवर्तनेति विषये कुम्भ की आस्था एवं जलवायुपरिवर्तन इति शीर्षकेण एका संगोष्ठि: समायोजिता। अस्य सम्मेलनस्य उद्घानम् उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथ: अकरोत्। अवसरेऽस्मिन् श्री आदित्यनाथेन भारतीयसंस्कृतौ जलवायुसंरक्षणस्य निहितमूल्यानामुपरि प्रकाशो सम्पातित:। तेनोक्तं यत् अथर्ववेदे उक्तमस्ति यत् – माताभूमि: पुत्रोऽहं पृथिव्या:। तेनोक्तं यत् वेदेषु अस्य समग्रस्य संसारस्य स्वस्ते: समुल्लेखो विद्यते इति। परं दैनन्दिनजीवने अस्य लक्ष्यस्य सम्प्रापणे प्रायश: वाधा: समुत्थिता: प्रतीयन्ते।

जलवायु सम्मेलनेऽस्मिन् धार्मिकनेतार:, पर्यावरणविद: सामाजिकसंघटनानि, उद्योगप्रति-निधय:, व्यापारजगत: नेतृत्वधायिन:, प्रतिष्ठित-नागरिका श्च भागमभजन्।

## मुम्बई-अग्निकाण्डम्

मुम्बयीत्याख्ये महानगरे जातायाम् अग्निदुर्घटनायां – द्वे महिले कालकवलिते अजायताम्, द्वे च व्रणिते स्त:। अद्य प्रात: एकादश-तलीये भवने जाते अग्निकाण्डे श्वासावरोधेन दुर्घटनैषा सञ्जाता। अग्निकाण्डोऽयं दक्षिणमुम्बईस्थे मस्जिद-बन्दरेति क्षेत्रे स्थिते पन्ना-अली-मेंशन इत्याख्ये भवने अभवत्। व्रणिता: जना: शासकीये जे.जे. चिकित्सालये उपचाराधीना: सन्ति।

## मेटा-घोषणा

फेसबुक-इन्स्टाग्राम्-व्हाट्स्ऐप त्येतानां स्वामित्व-धात्र्या मेटा इत्याख्यया संस्थया भारत-अमेरिकयोर्मध्ये सञ्चारतन्त्रस्य सुस्थापनाय अन्त: सागरीयक्षेत्रे पञ्चाशत्सहस्र-किलोमीटरात्मकं केवलाख्यं तन्त्रोच्छादनं करिष्यते इति घोषणा कृताऽस्ति। परियोजनैषा वॉटरवर्थ इति नाम्नाभिधीयते। अनया योजनया ब्रजिल-दक्षिण-अफ्रीकादि सहित अन्यानि च कानिचनक्षेत्राणि लाभान्वितानि भविष्यन्तीति मेराया: अस्त्युक्ति:।

## महिला-क्रिकेट

क्रिकेट स्पर्धायां अद्य गुजात जायन्ट्स दलं यूपी वॉरियर्स दलं सम्मुखिकारिष्यति। क्रीडा इयं वडोदराया: कोटाम्बी क्रीडाङ्गणे सार्ध सप्त वादने भविता। इत: प्राक् गुजरात जायन्ट्स दलेन षड्स्तोभै: बैङ्गलुरू दलं पराजितम्।

।। इति वार्ता:।।